"क्रान्तिपातचिह्नात् षड्भेऽन्तरेऽन्यच्चिह्नं कार्य्यम् । ते चिह्ने नाडीवृत्तेन संसक्ते कृत्वा पातचिह्नाद्यतस्त्रिभेऽन्तरे नाडीवृत्ताद्भागचतुर्विंशत्योत्तरतो यथा भवत्यपरविभागे त्रिभेऽन्तरे दक्षिणतश्च, तैर्भागैर्यथा भवति तथा बध्नीयात्" । प्रमि० अविर्कक्रान्तिशब्दे दृश्यम् । क्रान्तिवलयक्रान्तिमण्डलादयोऽप्यत्र ।

**क्रान्तिसाम्य** न० ६त० । ग्रहाणां तुल्यक्रान्तौ । यद्यपि सर्वे ग्रहाणां क्रान्तिसाम्यमस्ति तथापि चन्द्रार्कयोः क्रान्तिसाम्यस्य मङ्गलकार्य्ये वर्ज्जनीयता १८६५पृ०उपयमशब्दे विस्तरेण दर्शिता । क्रान्तिसाम्ये च ग्रहाणामवनत्यभावः सू० सि० दर्शितोयथा "अक्षोदगमध्यभक्रान्तेः साम्ये नावनतेरपि" सू० सि०

"अक्षांशा उत्तरा ये मध्यभस्य मध्यलग्नस्य क्रान्त्यंशाः । अत्र मध्यलग्नशब्देन दशमभावस्त्रिभोनलग्नं वा ग्राह्यस्तुभयपक्षेऽप्यदोषः । अनयोस्तुल्यत्वेऽवनतेर्नतेः अपिशब्दाद् सम्भवो न अभाव इत्यर्थः" रङ्गनाथः ।

**क्रान्तिसूत्र** न० सि०शि० उक्ते ध्रुवस्पर्शिनि क्रान्तीनां सूत्राकारे योगभेदे । "सर्व्वतः क्रान्तिसूत्राणां ध्रुवे योगो भवेद्यतः । विषुवन्मण्डलप्राच्या ध्रुवे याम्या तथोत्तरा" सि० शि० ।

**क्रान्तु** पुंस्त्री क्रम—तुन् वृद्धिश्च । पक्षिणि उज्ज्वलद० ।

**क्रायक** त्रि० क्री ण्वुल् । १क्रेतरि अमरः २क्रयजीविनि भरतः तच्चिन्त्यं तत्र क्रयिक इत्येव साधु जीवतीत्यर्थे वस्त्रादपि क्रयशब्दात् ठन्विधानात् ।

**क्रावन्** त्रि० क्रम—वनिप् "विड्वनोरनुनासिकस्यात्" पा० अस्यात् क्रान्तरि "दधिक्राव्णोऽकारिषं जिष्णोरश्वस्य वाजिनः" यजु०२३।२२। स्त्रियां ङीप् रश्चान्तादेशः क्रावरी ।

**क्रिमि** पु० क्रम—इन् अतइच्च । १कृमौ क्षुद्रजन्तौ उज्ज्वल० २रोगभेदे कृमिशब्दे २१८४पृ० विवृतिः। "कृमयस्तु द्विधा प्रोक्ताः बाह्याभ्यन्तरभेदतः । बहिर्मलकफासृग्विड्जन्मभेदाच्चतुर्विधाः । नामतो विंशतिविधा बाह्यास्तत्र मलोद्भवाः" "तिलप्रमाणसंस्थानवर्णाः केशाम्बराश्रयाः । बहुपादाश्च सूक्ष्माश्च यूका लिक्षाश्च नामतः" माधवः । "क्रिमयः कृमिलं यथा" भाग० ३,३१,२८, [ मेदि०

**क्रिमिकण्टक** न० क्रिमौ कण्टकमिव । कृमिकण्टकशब्दार्थे

**क्रिमिघ्न** पु० क्रिमिं हन्ति हन—टक् । १विडङ्गे रमानाथः । २कृमिनाशके त्रि० स्त्रियां ङीप् । सा च ३सोमराज्यां स्त्री शब्दच० । [२लाक्षायां स्त्री रत्नमाला ।

**क्रिमिज** न० क्रिमेर्जायते जन-ड ५त० । १अगुरुचन्दने अमरः

**क्रिमिशत्रु** पु० क्रिमेः शत्रुरिव नाशकत्वात् । रक्तपुष्पके (पालदामाँदार) शब्दच० । [खदिरे शब्दच० ।

**क्रिमिशातव** पु० क्रिमेः शातवद्व नाशकत्वात् । विट्-

**क्रिमिशैल** पु० क्रिमिनिर्म्मितः शैलः । वल्मीके (उइ-ढिपि) त्रिकाण्ड०

**क्रिय** पु० क्रिया ग्रहाणामाद्यगतिक्रिया विद्यतेऽत्र अच् । मेषराशौ टीपिका कौर्पशब्दे २२७८पृ० प्रमाणं दृश्यम् । "क्रियैणतौलीन्दुभतोनवांशाः" नील० ता० ।

**क्रिया** स्त्री कृ—भावे करणादौ वा यथायथं श । १आरम्भे २निष्कृतौ (प्रायश्चित्ते) ३शिक्षायां ४पूजायां ५संप्रधारणे (विवादविचाराङ्गे साधने) ६सामाद्युपाये । ७न्यायादिमतसिद्धे उत्क्षेपणादौ कर्म्मणि व्याकरणमतसिद्धे ८धात्वर्थे ९चेष्टायां (परिस्पन्दे) १०चिकित्सायां च अमरः । ११करणे(अनुष्ठाने)हेम०। १२श्राद्धे क्षीरस्वामी । १३शौचे शब्दरत्ना०। १४प्रयोगे च तत्र न्यायमतसिद्धा क्रिया कर्म्मशब्दे १७५५पृ० दर्शिता। कर्म्मत्वलक्षणन्तु औलूक्यशब्दे सर्व्व०द० वाक्ये १५८६पृ० उक्तम् तत्र अनित्यमात्रसमवेतत्वे सतीतिशुद्धम् नित्यमात्रसमवेतत्वाभावादित्यशुद्धम् अनित्यमात्रसमवेतत्वाभावादिति शुद्धम्। वैयाकरणमते तु धात्वर्थः क्रिया तत्स्वरूपशाब्दबोधप्रकारादि शब्दार्थरत्नेऽस्माभिर्निरूपितं यथा

"क्रिया च भावना उत्पादयितुर्व्यापाररूपा साध्यत्वेनाभिधीयमानेति बोध्यम् ।"व्यापारो भावना सैवोत्पादना सैव च क्रियेति" हर्य्युक्तेः "यावत्सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते । आश्रितक्रमरूपत्वात् सा क्रियेत्यभिधीयते" इति "साध्यत्वेन क्रिया तत्र तिङ्पदैरभिधीयते" इति च वाक्यपदीयाच्च । "यावदिति सर्व्वमित्यर्थः तदेव विवृणोति सिद्धमसिद्धं वेति । सिद्धं वर्त्तमानध्वंसप्रतियोगि, तद्भिन्नमसिद्धं तच्च वर्त्तमानं भविष्यच्चेति द्विविधं तेनापचत् पक्ष्यति पचतीत्यादौ सर्वत्र साध्यत्वेन असत्वरूपत्वेनाभिधीयमाना क्रियेति क्रियाशब्दस्य रूढिरनेन दर्शितेति भावः । यौगिकत्वमप्याह आश्रितक्रमरूपत्वादिति । आश्रितःक्रमो रूपं यस्यास्तत्त्वात् पूर्वापरीभूतावयवकत्वादित्यर्थः । तदीयावयवानामधिश्रयणाद्यधःश्रयणपर्य्यन्तानां क्रमेणोत्पत्तेः क्रियापदेन तत्समुदायोऽभिधीयते यत्र च न क्रमिको व्यापारोऽस्ति तत्र रूढिरादरणीयेति पौर्वापर्य्यारोपेण वा सर्व्वत्र फलस्य खजन-